## विभाषाख्यानपरिप्रश्नयोरिञ् च। (११०/३२८७)

[1]पूर्वं परिप्रश्नः, पश्चादाख्यानम्। सूत्रेऽल्पाच्तरस्य पूर्वनिपातः। परिप्रश्ने आख्याने च गम्यमाने धातोः इञ् प्रत्ययो भवति, चकारात् ण्वुल् [2]अपि। विभाषाग्रहणात् [3]परोऽपि यः प्राप्नोति, सोऽपि भवति। कां त्वं कारिमकार्षीः, कां कारिकाम् अकार्षीः, कां क्रियामकार्षीः, कां कृत्यामकार्षीः, कां कृतिमकार्षीः? [4]सर्वां कारिमकार्षम्, सर्वां कारिकाम् अकार्षम्, सर्वां क्रियामकार्षम्, सर्वां कृत्यामकार्षम्, सर्वां कृतिमकार्षम्। कां गणिमजीगणः, कां गणिकामजीगणः, कां गणनामजीगणः? [5]सर्वां गणिमजीगणम्, सर्वां गणिकाम्, सर्वां गणनाम्। [6]एवं कां याजिम्, कां याजिकाम्, कां याचिम्, कां याचिकाम्, कां पाचिम्, कां पाचिकाम् कां पचाम्, कां पक्तिम्, कां पाठिम्, कां पाठिकाम्, कां पठितिम् इति द्रष्टव्यम्। आख्यानपरिप्रश्नयोः इति किम्? [7]कृतिः। हृतिः[8]॥

## पर्यायार्हर्णोत्पत्तिषु ण्वुच्। (१११/३२८८)

[9]पर्यायः परिपाटीक्रमः। अर्हणमर्हः, तद्योग्यता। ऋणं [10]तत् यत् [11]परस्य धार्यते। उत्पत्तिः जन्म। एतेष्वर्थेषु[12] धातोः ण्वुच् प्रत्ययो [13]भवति। [14]क्तिन्नादीनामपवादः। पर्याये तावत् – भवतः शायिका। भवतोऽ[15]-ग्रग्रासिका। अर्हे – अर्हति भवान् [16]इक्षुभक्षिकाम्। ऋणे – इक्षुभक्षिकां [17]मे धारयसि। ओदनभोजिकाम्[18]। पयःपायिकाम्[19]। उत्पत्तौ – इक्षुभक्षिका मे उदपादि। ओदनभोजिका[20]। [21]पयःपायिका। विभाषा इत्येव, [22]चिकीर्षा उत्पद्यते। ण्वुलि प्रकृते प्रत्ययान्तरकरणं स्वरार्थम्॥

## आक्रोशे नञ्यनिः। (११२/३२८९)

[23]विभाषा इति निवृत्तम्। आक्रोशः शपनम्। [24]आक्रोशे गम्यमाने नञि उपपदे धातोः अनिः प्रत्ययो भवति। क्तिन्नादीनामपवादः। [25]अकरणिस्ते वृषल भूयात्। आक्रोशे इति किम्? अकृतिस्तस्य [26]कटस्य। नञि इति किम्? मृतिस्ते वृषल भूयात्॥

## कृत्यल्युटो बहुलम्। (११३/२८४१)

भावे, अकर्तरि च कारके इति निवृत्तम्[27]। कृत्यसञ्ज्ञकाः प्रत्ययाः ल्युट् च बहुलमर्थेषु भवन्ति। यत्र [28]विहितास्ततोऽन्यत्रापि भवन्ति। भावकर्मणोः कृत्या विहिताः कारकान्तरेऽपि भवन्ति। [29]स्नानीयं चूर्णम्। दानीयो ब्राह्मणः। करणाधिकरणयोः भावे [30]च ल्युट्। अन्यत्रापि भवति। [31]अपसेचनम्। अवस्रावणम्। राजभोजनाः शालयः। राजाच्छादनानि वासांसि। [32]प्रस्कन्दनम्। प्रपतनम्। बहुलग्रहणादन्येऽपि कृतः यथाप्राप्तमभिधेयं व्यभिचरन्ति। पादाभ्यां ह्रियते पादहारकः। गले [33]चोप्यते गलेचोपकः[34]॥

---

1. ण्वुल् इत्येव इत्यधिकम् क. फ. ह. 2. च फ. 3. अपरो ब. ड. 4. सर्वत्र बहुवचनं दृश्यते ड. 5. सर्वा गणीरजीगणम् ड. 6. इत्यादि द्रष्टव्यम् फ, एवं – हृतिः नास्ति फ, एवं कं पाचिम्, कं याजिम् इति द्रष्टव्याः अ. ड. 7. कृतिः नास्ति ह. 8. भृतिः इत्यधिकम् फ, शृतिः इत्यधिकम् क. 9. स्त्रियामित्येव इत्यधिकम् ब. 10. तत् नास्ति क. 11. परस्मै फ. 12. गम्यमानेषु इत्यधिकम् ह. फ. 13. भवति नास्ति फ, विधीयते अ. 14. विभाषा इत्यधिकम् अ. क. ड. 15. अग्रग्रामिका अ. क. फ. ह, ग्रामगामिका ब, भवत आसिका ब. क. ड. 16. पयःपायिकाम् ब. 17. मे नास्ति क. 18. मे धारयसि इत्यधिकम् फ. 19. इत्यादि भवति ऋणे इत्यधिकम् फ. 20. उदपादि इत्यधिकम् फ. 21. पयःपायिका नास्ति ब. 22. जिहीर्षा फ. 23. स्त्रियामित्येव इत्यधिकम् ब. 24. तस्मिन् फ. 25. अप्रापणिः क, अप्रयाणिः ड. 26. पटस्य ब, घटस्य क. 27. स्त्रियामिति च इत्यधिकम् ब. 28. उक्ताः फ. 29. करणे इत्यधिकम्, दानीयं ह. 30. च नास्ति ह. 31. कर्मणि इत्यधिकम् ह. 32. प्रस्तननम् ह. 33. चोप्यते नास्ति फ, चुप्यते ब. ड. 34. अमूर्धमस्तकादित्यलुक् इत्यधिकम् क.